ISSN 2454-8596
www.vidhyayanaejournal.org
An International Multidisciplinary Research e-Journal

# निरुक्तानुसारं सूर्यवाचकपदानामध्ययनम्

**Kaushik Rajyaguru**

Research Scholar

Dept. of Sanskrit

Saurashtra University, Rajkot

★ **प्रस्तावना**

आर्याणां देवताविषयकी सर्वप्रथमा तथा प्रमुखधारणा आकाशस्य दीप्तिमत्शक्तितः सम्बन्धिताः । दिव्–धातुतः निष्पन्नः देवशब्दः तस्या एव परिचायकः । आकाशेन सम्बन्धितानां दिव्यशक्तीनाम् आदित्यस्य गणः वैदिकसाहित्ये स्वकीयस्य महत्त्वस्य कारणत्वात् अद्वितीयं स्थानं स्थापितः ।

★ **निरुक्तानुसारं सूर्यवाचकपदानि तेषामर्थश्च**

निघण्टौ १.४ इत्यत्र[1] स्वः, पृश्निः, नाकः, गौः, विष्टपः, नभः इति षट् साधारणानि । इमानि षण्णामानि ऋग्वेदे आदित्याय द्युलोकाय च समानानीति यास्काचार्यः निरुक्ते २/१४ प्रतिपादयति । अत्र यास्काचार्यः व्युत्पादयति यत् – **'आदत्ते रसान् । आदत्ते भासं ज्योतिषाम् । आदीप्तो भासेति वा । अदितेः पुत्र इति वा ।'** इत्यनेन प्रकारेण यास्काचार्यस्य मतानुसारं सूर्यः एकः आदित्यः वर्तते । लक्ष्मणसरूपः व्याख्यायति यत् – He takes the fluids, he takes (i.e. Eclipscs) the light of Luminaries or he blazes with luster or he is the son of Aditi. आदित्य अर्थात् 'यः रसान् आदत्ते, यः ज्योतिषाम् भासमादत्ते, यः आदीप्तो भासेति वा, अथवा अदितेः पुत्रः इति वा सूर्यः ।' सूर्यस्येमानि नामानि विस्तृतरूपेणात्र विवेचनीयानि ।

★ **स्वर्** – निरुक्ते (२/१४) स्वर्शब्दस्येत्थं व्युत्पत्तिः प्राप्यते । **'स्वरादित्यो भवति । सु अरणः । सु ईरणः । स्वृतो रसान् । स्वृतो भासं ज्योतिषाम् । स्वृतो भासेति वा ।'** निरुक्तभाष्यकारः लक्ष्मणसरुपः अस्याः व्युत्पत्तेः व्याख्यायं लिखति यत् – Svar means the Sun; it is very distant, it has well dispersed (the darkness), it has well penetrated the light of the luminaries, or it is pierced through with light.

सु + अरणः=अर्, सु+इरिणः=इर् एवं सु+ऋ=स्वर् इत्यनेन प्रकारेण स्वर्शब्दस्य व्याख्यायां 'अर्, इर्, ऋ' धातवः दृश्यन्ते ।

---

1 स्वः, पृश्निः, नाकः, गौः, विष्टपः, नभः इति षट् साधारणानि । निघण्टु – १/४

ISSN 2454-8596
www.vidhyayanaejournal.org
VIDHYAYANA
An International Multidisciplinary Research e-Journal

ऋग्वेदे १/११२/५ [2] एवं १/१४८/१ [3] इत्यत्र 'स्वर्'शब्दः सूर्याय प्रयुक्तः । तत्र भाष्ये सायणाचार्यः निरुक्तान्तान्तर्गत–समागत–विवेचनेन (२/१४) सह'स्वर्'–अर्थात् 'सूर्यः' इत्युक्तः ।[4] ग्रिफिथः तेजस्वी प्रकाशः एवं सूर्य इति 'स्वर्'शब्दस्यार्थः कृतः ।

गृत्समदऋषिविरचिते २/२ इत्यस्मिन् सूक्ते ७,८,१० इति ऋचासु 'स्वर्'नाम 'स्व१र्ण' इत्थं प्रकारेण समागतम्, यन्नाम सूर्याय प्रयुक्तम् । २/८/४, २/२१/४, २/२४/३, २/२४/४, ४/१०/३, ४/४५/२, ५/१४/४, ५/४५/१, ५/४६/३, ६/२९/३, ७/१०/२, ७/३४/१९, ९/११३/७, १०/४३/९, १०/६८/९, १०/१२३/७ इत्यासु ऋचासु 'स्वर्' इति नाम सूयस्य प्रकाशाय प्रयुक्तम् ।

★ **पृश्निः – पृश्निरादित्यो भवति । प्राश्नुत एनं वर्ण इति नैरुक्ताः । संपृष्टो रसान् । संपृष्टा भासं ज्योतिषाम् । संपृष्टो भासेति वा ।**

prsni means the Sun. 'It is thoroughly pervaded by the bright color' say the etymologists. It closely unites the fluids; it closely unites the light of the Luminaries. It is closely united with light.

४/३/१०, ५/४७/३, ९/८३/३, १०/१८९/१ इत्यत्र 'पृश्नि' नाम सूर्याय समागतम् । ४/३/१० इत्यत्र सायणाचार्यः 'पृश्नि'अर्थात् सूर्यः इति कथयति ।[5] ग्रिफिथस्तु पृश्निनाम एव स्वव्याख्यायां प्रददाति । ऋग्वेदे ५/४७/३ इत्यत्रापि सायणाचार्यः 'पृश्नि'रर्थात् सूर्यः इति कथयति ।[6]

ऋग्वेदे ९/८३/३[7] इत्यत्रापि सायणाचार्यः स्वभाष्ये कथयति यत् 'पृश्नि'रर्थात् सूर्यः ।[8] पृश्निरादित्यः ।

---

2 याभी रेभं निवृतं सितमद्भ्य उद्वन्दनमैरयतं स्वर्दृशे ।
याभिः कण्वं प्र सिषासन्तमावतं ताभिरू षु ऊतिभिरश्विना गतम् ।। ऋ.–१/११२/५

3 मथीद्यदीं विष्टो मातरिश्वा होतारं विश्वाप्सु विश्वदेव्यम् ।
नि यं दधुर्मनुष्यासु विक्षु स्व१र्ण चित्रं वपुषे विभावम् ।। ऋ.–१/१४८/१

4 स्वः आदित्यं, तदुक्तं यास्केन, 'स्वरादित्यो भवति सु अरणः सु ईरणः' (निरुक्तम्–२/१४) इति । ऋग्वेदसायणभाष्यम् – १/११२/५

5 ऋतेन हि ष्मा वृषभश्चिदक्तः पुमाँ अग्निः पयसा पृष्ठ्येन ।
अस्पन्दमानो अचरद्वयोधा वृषां शुक्रं दुदुहे पृश्निरूधः ।। ऋ.–४/३/१०

6 उक्षा समुद्रो अरुषः सुपर्णः पूर्वस्य योनि पितुरा विवेश ।
मध्ये दिवो निहितः पृश्निरश्मा विचक्रमे रजसस्पात्यन्तौ ।। ऋ.–५/४७/३

ISSN 2454-8596
www.vidhyayanaejournal.org
VIDHYAYANA
An International Multidisciplinary Research e-Journal

ऋग्वेदे १०/१८९/१[9] इत्यत्र सूर्यसूक्तस्य ऋचायामपि सूर्यवाचकः पृश्निशब्दः वर्तते । सायणाचार्यस्य ग्रिफिथस्य च मतानुसारमत्र पृश्निरर्थात् सूर्यः ।

★ **नाकः – नाक आदित्यो भवति । (नेता रसानाम्) नेता भासाम् । ज्योतिषां प्रणयः ।** काठकसंहितायां 'नाकम्'अर्थात् यत्र दुःखं नास्ति तत् । केवलं पुण्यकर्ता एव तत्र गन्तुं शक्नुवन्ति ।[10]

ऋग्वेदे ५/५४/१२ इति ऋचायां नाकम् इत्यस्यार्थः सूर्य वर्तते ।[11] सायणाचार्यः[12] आदित्येति अर्थं करोति । ऋग्वेदस्य ७/८६/१ इति ऋचायां 'नाकम्'शब्दः सूर्यवाचकः ।[13] सायणाचार्यस्य मतानुसारं[14] तत्र 'नाकम्' इत्यस्यार्थः 'आदित्यः' वर्तते ।

★ **गौः – गौरादित्यो भवति । गमयति रसान् । गच्छन्त्यन्तरिक्षे ।**

गौ इत्यत्र गम्धातुरिति प्रतितः । ऋषीनोषधगौतमस्य इन्द्रसूक्ते १/६२/५ इत्यत्र सूर्यकिरणेभ्यः गौरिति कथितः ।[15] ऋग्वेदे ३/५६/२ इत्यस्याम् ऋचायां[16] संवत्सरवर्णनसमये सूर्यः स्वकिरणैः प्रकाशदाता 'गौ'रिति कथितः । गावः शब्दस्यार्थः सायणाचार्यः रश्मयः इति करोति ।

---

7 अरूरुचदुषसः पृश्निरग्निय उक्षा बिभर्ति भुवनानि वाजयुः ।
मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भमा दधुः ।। ऋ.–९/८३/३

8 पृश्निः आदित्यः । पृश्निरादित्यो भवति प्राश्नुतं एनं वर्णम् : निरुक्तम् – २/१४ इति निरुक्तम् । ऋग्वेदसायणभाष्यम्–९/८३/३

9 आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः । पितरं च प्रयन्त्स्वः ।। ऋग्वेदः – १०/१८९/१

10 न वै अमुं लोकं जग्मुषे किञ्चन अकम् । पुण्यकृतः हि एव तत्र गच्छन्ति । काठकसंहिता–२१/२

11 तं नाकमर्यो अगृभीतशोचिषं रुशत्पिप्पलं मरुतो वि धूनुथ ।
समच्यन्त वृजनातित्विषन्त यत्स्वरन्ति घोषं विततमृतायवः ।। ऋ.–५/५४/१२

12 नाकम् आदित्यम् । नास्मिननकमस्तीति नाकः ।। ऋग्वेदसायणभाष्यम् – ५/५४/१२

13 धीरा त्वस्य महिना जनूंषि वि यस्तस्तम्भ रोदसी चिदुर्वी ।
प्र नाकमृष्वं नुनुदे बृहन्तं द्विता नक्षत्रं पप्रथच्च भूम ।। ऋग्वेदः – ७/८६/१

14 नाकम् आदित्यं नक्षत्रं च । ऋग्वेदसायणभाष्यम् – ७/८६/१

15 गृणानो अङ्गिरोभिर्दस्य वि वरुषसा सूर्येण गोभिरन्धः ।

ISSN 2454-8596
www.vidhyayanaejournal.org
VIDHYAYANA
An International Multidisciplinary Research e-Journal

ऋग्वेदे ४/१/१६ एवं ४/२२/४ इत्यत्र गौरिति शब्दः सूर्यायैव प्रयुक्तः । ऋग्वेदे ५/४७/४ इत्यत्र[17] तथा च ६/६४/३ इत्यत्रापि[18] सूर्यकिरणेभ्यः 'गाव' इति शब्दः प्रयुक्तः ।

उपर्युल्लिखितऋचासु गौरिति शब्दः सूर्यस्य गमनशीलकिरणेभ्यः सूर्याय च प्रयुक्तः दृश्यते ।

★ **विष्टपः – विष्टावादित्यो भवति । आविष्टो रसान् । आविष्टो भासं ज्योतिषाम् । आविष्टो भासेति वा ।**

ऋ.–८/६९/७ इत्यत्र विष्टपः सूर्यस्य स्थानं दर्शयितुं प्रयुक्तः ।[19]

सायणाचार्यः 'विष्टपं सूर्यस्य स्थानं' इति कथयति ।[20] ९/११३/१० इत्यत्र[21] सूर्येण प्रकाशमानं स्थानं दर्शयितुं विष्टप् शब्दः प्रयुक्तः । अस्यां ऋचायां सायणाचार्यस्य मतानुसारं[22] सूर्यः इति विष्टपशब्दस्यार्थः ।

इत्यादिषु ऋचासु विष्टपः इति शब्दः केवलं 'प्रकाशः' इत्यर्थो दर्शयति ।

---

वि भूम्या अप्रथय इन्द्र सानु दिवो रज उपरमस्तभायः ।। ऋ.–१/६२/५

16 षडभाराँ एको अचरन्बिभर्त्यृत वर्षिष्ठमुप गाव आगुः ।
तिस्रो महीरुपरास्तस्थुरत्या गुहा द्वे निहिते दर्श्येका ।। ऋ.–३/५६/२

17 चत्वार इ बिभ्रति क्षेमयन्तो दश गर्भं चरसे धापयन्ते ।
त्रिधातवः परमा अस्य गावो दिवश्चरन्ति परि सद्यो अन्तान् ।। ऋ.५/४७/४

18 वहन्ति सीमरुणासो रुशन्तो गावः सुभगामुर्विया प्रथानाम् ।
अपेजते शूरो अस्तेव शत्रून्बाधते तमो अजिरो न वोळहा ।। ऋ.–६/६४/३

19 उद्यब्द्रध्नस्य विष्टप गृहमिन्द्रश्च गन्वहि ।
मध्वः पीत्वा सचेवहि त्रिः सप्त सख्युः पदे ।। ऋ.–८/६९/७

20 विष्टपं सूर्यस्य स्थानं, सप्त इत्यनेन देवलोकानामुत्तममेकविंशं स्थानमुच्यते आदित्यस्यैकविंशत्वात् । तथा च ब्राह्मणं द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंश । (ऐ.ब्रा.–१/३०) ऋग्वेदसायणभाष्यम् – ८/६९/७

21 यत्र कामा निकामाश्च यत्र ब्रध्नस्य विष्टपम् ।
स्वधा च यत्र तृप्तिश्च तत्र माममृतं कृधीन्द्रयेन्दो परिस्रव ।। ऋ.–९/११३/१०

22 यत्र लोके ब्रध्नस्य सर्वेषां प्रज्ञापकस्य । यद्वा । सूर्येण विना कर्माणि न घटन्त इति सर्वेषां कर्मणां मूलभूतस्यादित्यस्य विष्टपं सहस्थानं यत्र विद्यते तत्र लोके । ऋग्वेदसायणभाष्यम्–९/११३/१०

★ **नभः – नभ आदित्यो भवति । (नेता रसानाम्) नेता भासाम् । ज्योतिषां प्रणयः । अपि वा भन एव स्याद्विपरीतः ।**

८/९६/१४ इति ऋचायां नभ अर्थात् 'अन्तरिक्षे विराजमानः सूर्य इव'[23] इति कृतः । ९/७४/४ इत्यत्र नभ अर्थात् 'नभस्थ सूर्य इव'[24] इति ।

इत्थं सामूहिकरूपेण आदित्यगणः दिव्यज्योतितः सम्बन्धितत्वेऽपि सत्यस्य पवित्रतायाः ऋतस्य च रक्षकः । तथा नैतिक–शाश्वत–अभंग्य–सांसारिकनियमानामपि संस्थापकः ।

**सन्दर्भग्रन्थसूचिः**

यास्ककृतं **निरुक्तम्** प्रकाशन – चौखम्बा सुरभारती प्रकाशन, वाराणसी, व्याख्याकार – आचार्य शिवप्रसाद द्विवेदी

**ऋग्वेद :** सायण भाष्य, प्रकाशन – वैदिक शोध मंडल, पूना ई. १९४६

23 द्रप्समपश्यं विषुणे चरन्तमुपह्वरे नद्यो अंशुमत्याः ।
नभो न कृष्णमवतस्थिवांसमिष्यामि वो वृषणो युध्यताजौ ।। ऋ.–८/९६/१३

24 आत्मन्वन्नभो दुह्यते घृतं पय ऋतस्य नाभिरमृतं वि जायते ।
समीचीनाः सुदानवः प्रीणन्ति तं नरो हितमव मेहन्ति पेरवः ।। ऋ.–९/७४/४